M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 1420

Title : Pratimoddharana

1420

incomplete

Pratimoddharaṇe

:	:	Pratimoddharaṇe	: **Title**
:	:		: Author
:	:		: Editor
:	:		: Year, Vols.
:	:		: Publisher
1420 :	:		: Remarks

श्री: स्फुटितेखंडितेभग्नेदग्धेवाशनिनाग्निना
स्फुटितेएकदेशभग्नेइत्यर्थः कर्तरिष्टकरेतस्मा
त्कुर्यादुद्धरणक्रियां सुवर्णाद्यष्टलोहनिर्मितलिं
गंभग्नंसन्नदेवंसऽज्ञंकृत्वापुनःस्थापयेत् ॥ बाहु
पादशिरोहीनां कर्णनासास्यहीनकां ताद्दशीं
परिवाराणांप्रतिमांपरिवर्जयेत् यद्द्रव्यंयत्प्र
माणंचलिंगंवाप्रतिमापिवा ताद्दक्तेनैवमा
नेनतद्द्रव्येणप्रकल्पयेत् कारयेन्नान्यमानेन
नान्यद्द्रव्येणतत्पुनः नान्याकारंचनान्यत्र

स्थापयेत्तद्गुरुर्नमः वृषसंयोजयित्वानुमंत्रे
णोद्धाघदेशिकः दारवीं दाहयेद्वह्नौ शैल
जां प्रक्षिपेज्जले धातुजां रत्नजां वापि प्रक्षि
पेन्मकरालये अगाधे वान्यतोये वा क्षिपेज्ज
लं महाजले यानमारोप्य जीर्णां वाच्छाद्य वस्त्रा
दिना गुरुः शंखदुंदुभिनिर्घोषैर्गीतवादित्रनिः
स्वनैः नीत्वागाधं जलं रम्यं भागीरथ्यां महार्णवे
विष्वक्सेनाय वीर्येण प्रक्षिपेत्तां महागुरुः ॥ ॥
ततो निवेदयेदन्यां प्रतिमां लक्षणान्वितां

तत्क्षणाद्देवराजेंद्र तस्य दोषस्य शांतये संप
त्तिर्वा विपत्तिर्वा नोपेक्षां तत्र कारयेत् यद्द्रव्या
यत्प्रमाणा च या मूर्त्योद्धृता हरेः तद्द्रव्या
तत्प्रमाणा च सा मूर्तिस्तत्र कीर्तिता यत्प्र
माणा यदाकारं यन्मध्ये बिंबमुद्धरेत् यत्प्रमा
णं तदाकारं तन्मानं तत्र विन्यसेत् द्वितीये वा
तृतीये वा दिवसे स्थापयेद्गुरुः अतऊर्ध्वं भवे
द्दोषो विधिनापि निवेशिते